# Model Question Paper
## First Term Evaluation 2025 -26
### First Language - Paper I - Part I
## SANSKRIT
### (For Academic and Oriental Sanskrit Schools)

**Class- X**
**Time 1 ½ Hours** **Total Score - 40**

निर्देशा: -

- 15 निमेषा: समाश्वासकाल: ।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्का: काल: च परिगणनीया:।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

© State Assessment Cell – SCERT Kerala

**भागः - 1**

1. अधोदत्तेभ्यः विकल्पेभ्यः भिन्नं गणं चित्वा लिखत । (1)

क) क्षितिः - भूमिः ख) सीरः - हलम्

ग) कलिन्दजा - सूरजा घ) पयस्विनी - गोपालकः

2. अधोदत्तपट्टिकां पठित्वा विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (1)

| | |
|---|---|
| लिखित्वा | - तुमुन्नन्तम् |
| स्वीकृत्य | - क्त्वान्तम् |
| व्यवहर्तुम् | - ल्यबन्तम् |

क) लिखित्वा – तुमुन्नन्तम्, स्वीकृत्य – क्त्वान्तम्, व्यवहर्तुम् – ल्यबन्तम्

ख) लिखित्वा – ल्यबन्तम्, स्वीकृत्य – तुमुन्नन्तम्, व्यवहर्तुम् – क्त्वान्तम्

ग) लिखित्वा – क्त्वान्तम्, स्वीकृत्य – ल्यबन्तम्, व्यवहर्तुम् - तुमुन्नन्तम्

घ) लिखित्वा – क्त्वान्तम्, स्वीकृत्य – तुमुन्नन्तम्, व्यवहर्तुम् – ल्यबन्तम्

**प्रस्तावनां पठित्वा 3-4 प्रश्नयोः उत्तरे लिखत।**

3. (१) प्रशस्तस्य परितः आराधकाः सन्ति। (1)

(२) गायकं परितः आस्वादकाः सन्ति।

क) उभयमपि (१, २) साधु ।

ख) उभयमपि (१, २) असाधु ।

ग) १-साधु, २-असाधु ।

घ) १-असाधु, २-साधु ।

4. (१) सचिवः जनान् भाषमाणः वर्तते। (1)

क) सचिवः - शानजन्तम्

ख) जनान् - शानजन्तम्

ग) भाषमाणः - शानजन्तम्

घ) वर्तते - शानजन्तम्

**भागः -2**

**कविताभागं पठित्वा 1-2 प्रश्नयोः उत्तरे लिखत।**

प्रकृतिस्तु मोहनाकारेण भीषणे-
नानन्त्यरूपेण वर्ततेऽत्र।
वनराजिसम्पदः प्राणिनामिव मर्त्य-
लोकस्य सर्वथा हितकराः स्युः॥

5. समानसन्धियुक्तं पदं पद्यभागात् स्वीकृत्य पदच्छेदं लिखत (2)

उदा – युवतिस्तु = युवतिः + तु ।

.............=...........+.........।

विद्यतेऽत्र = विद्यते + अत्र ।

............=.............+........।

6. वनसम्पदः सर्वेषां प्राणिनाम् अत्यन्तम् उपकारप्रदाः भवन्ति – इत्याशययुक्तं कविताभागं चित्वा लिखत । (2)

7. गद्यांशं पठित्वा बलदेवस्य वचनानि समाहृत्य संभाषणांशं पूरयत । (2)

हलायुधम् उपेत्य गोपालकाः अवदन् – भो बलदेव! अस्माकं प्रदेशोऽयं जलाभावेन ऊषरो भवति। वयं किं कुर्मः? 'सूरजायाः अनुग्रहेण क्षितिरियं आर्द्रा भवेत्' इति सः गोपालकान् समाश्वासितवान्। ततः बलदेवः कालिन्दीं प्रार्थयत – भोः कलिन्दजे! कारुण्यशालिनि! तव कृपाम् पुनरपि अत्र प्रसारयतु।

गोपालकाः – वयं किं कुर्मः?

बलदेवः - ........................................................।

(गोपालकाः गच्छन्ति।)

बलदेवः - (कालिन्दीं प्रति) ..............................................।

**8. रेखाङ्कितपदं उत्तरत्वेन भवितुं योग्यं प्रश्नं रचयत ।** (2)

(प्रश्नवाचकपदानि – कः, कम्, केन, कस्य, कस्मिन् ।)

क) गोपालकाः हलायुधम् उपेत्य अवदन् । ..................................................?

ख) बलदेवः हलेन कालिन्दीं आक्षिपत्।.......................................................?

© State Assessment Cell – SCERT Kerala

**अथवा**

**अधोदत्तानि क्रियापदानि उपयुज्य नूतनवाक्यं रचयत।**

क) विराजते - ............................................................................।

ख) व्यरचयत् - ..........................................................................।

9. **ऋते** – उपयुज्य वाक्यद्वयं योजयत। (2)

उदा – आपणे टिप्पणीपुस्तकं नास्ति। अन्यत् सर्वम् अस्ति।

आपणे टिप्पणीपुस्तकात् **ऋते** अन्यत् सर्वम् अस्ति।

क) तस्मिन् कारुण्यं नास्ति। अन्यत् सर्वं अस्ति।

...........................................................................।

**श्लोकममुं पठित्वा 12-15 प्रश्नानाम् उत्तराणि लिखत।**

सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः॥

10. गद्यक्रमं पूरयत। (2)

पतिंवरा सा रात्रौ ............... दीपशिखा ...................... यं यं व्यतीयाय स स .................. नरेन्द्रमार्गाट्ट इव ..................... प्रपेदे।

11. विग्रहवाक्यं लिखत। (2)

पतिंवरा ..........................................।

भूमिपालः ........................................।

12. श्लोकस्य आशयं स्ववाक्यैः लिखत। (3)

13. खण्डिकामिमां लङ् लकारेण परिवर्त्य लिखत। (3)

अनन्तः निलातीरे एकां वृद्धां पश्यति। स्वसंघेन परित्यक्ता सा माता स्वस्य निःसहायताम् अनन्तं सूचयति। किं कर्तव्यमिति अजानन् अनन्तः तां मातरं स्वकीयभवनं नयति।

**14. प्रादेशिकभाषया आशयानुसारं विवर्तयत।** (4)

स्टेल्ला मार्गस्य पार्श्वे उपविशति। कार् यानेन आगतः कश्चन पुरुषः मालिन्यस्यूतं मार्गस्य समीपं निक्षिप्य अगच्छत्। सप्तवर्षीया सा स्टेल्ला तद्दृष्ट्वा चकिता अभवत्। मालिन्यं इतस्ततः न निक्षिपतु इति विद्यालये सा पठितवती अस्ति। सा तं मालिन्यस्यूतम् आदाय अवकरिकायाम् अपातयत्।

15. प्रख्यातेन डच् सैनिकेन हैन्ड्रिक् वान् रीड् महाभागेन विरचितः ग्रन्थः भवति होर्त्तूस् मलबारिक्कूस्। केरलेषु उपलब्धानां बहूनां सस्यानां औषधगुणानां च परामर्शः तस्मिन् विद्यते।

आमलक्यादीनां सस्यानां औषधगुणान् अधिकृत्य स्ववाक्यैः लघुविवरणं लिखत। (4)

© State Assessment Cell – SCERT Kerala

**श्रद्धेयाः अंशाः** – निम्बः - अशोकः – व्रणनाशकः - ऊर्जप्रदायिनी - केशवर्धिनी

**अथवा**

होर्त्तूस् मलबारिक्कूस् नामकस्य ग्रन्थस्य रचनायाम् अनेके केरलीयपण्डिताः सहायकाः अभवन्। तेषु प्रमुखः आसीत् इट्टि अच्युतन्।

केरलीयपण्डितानां योगदानमधिकृत्य स्ववाक्यैः लघुटिप्पणीं लिखत।

**श्रद्धेयाः अंशाः** – रंगपट्ट् – विनायकपण्डिट्ट् – चोल् केट्ट पुस्तकम् – मदनपालनिघण्डु ।

16. पञ्चमहाकाव्यानां रचनावैशिष्ट्येन कालिदासादिभ्यः विशेषबिरुदानि प्राप्तानि सन्ति। तानि यथायोग्यं पट्टिकायां विलिख्य पूरयत। (4)

| कविः | ख्यातिः | काव्यम् |
|---|---|---|
| कालिदासः | ................................ | रघुवंशम् |
| ............................... | छत्रभारविः | किरातार्जुनीयम् |
| माघः | घण्डामाघः | ................................ |
| .......................... | विद्वदौषधम् | नैषधीयचरितम् |

**अथवा**

**संभाषणांशं स्वभावनया पूरयत।**

कालिदासः - अहं महाकाव्यद्वयं लिखितवान् ।

भारविः - जानामि, जनाः भवन्तं .................................. इति आह्वयन्ति किल।

माघः - दीपशिखेति कस्मिन् काव्ये प्रयुक्तम्?

कालिदासः - .............. महाकाव्ये। भारवेः अपि अपरं नाम वर्तते किल?

माघः - अस्त्येव .............................. इति।

कालिदासः - छत्रमिव धूलिः। आहा। सा वर्णना .......................... काव्ये किल।

भारविः - आम्। तथा संवृत्तम्।

17. वनसंरक्षणमधिकृत्य लघुटिप्पणीं लिखत । (4)

**श्रद्धेयाः अंशाः** – प्रकृतेः परिच्छेदः – जीविनाम् आवासः – वननशीकरणम् – वनविभवानां दुरुपयोगः – वृक्षाणां संरक्षणम्।

**अथवा**

नदीनां कालिकप्राधान्यमधिकृत्य लघूपन्यासं लिखत।

**श्रद्धेयाः अंशाः** – जलस्रोतांसि – जलप्रदूषणम् – मालिन्यनिक्षेपः – गतागतसुविधा – विद्युदुत्पादनम् – विनोददायिका ।

© State Assessment Cell – SCERT Kerala